श्री नेहरू निर्वाण कुसमाञ्जलिः

समस्या—

शान्तिदूतः सदापायात्
प्रजातन्त्रं महीतले
दिवंगच्छन्निजां छायां

अद्य सोऽस्तमयमेति शान्तिमान्
भास्करः कमलया समर्चितः ।

येन विश्वजनता सुशासिता
शत्रवश्च सुगुणैर्वशीकृताः ॥१॥

योहि भारतधरां स्वपूजयत
कर्मयोगसरणीमनुसरन्

देवकीतनयवन्निरायुधः
पञ्चशीलनियमान्प्रवर्तयन् ॥२॥

जायन्ते च म्रियन्ते च बहवो नयकोविदाः ।
एक एव जवाहीरोऽमरत्वमवाप ह ॥३॥

महासमरप्रारम्भे संप्राप्ते राष्ट्रविप्लवे ।
निरस्त्रीकरणनीतिं जनेवादेशगामिनाम् ॥४॥

कृतवाञ्छ्रोजवाहीरो भारतस्य महामणिः ।
दयालुर्दानशीलश्च गांधिवादप्रवर्तकः ।५।

यस्य चित्ते क्षमाहिंसा सत्यं च सर्वदास्थितम् ।
समुद्र इव गम्भीरो मेरुरिव समुन्नतः ॥६॥

तेजसादित्यसंकाशः स्थिरचित्तो नगेंद्रवत् ।
हरिश्चन्द्रसमो दाता शुक्राचार्यसमो नये ॥७॥

बलवान् शौर्यवान धीमान् वायुतुल्यपराक्रमी ।
दारिद्र्यतापशमनः पूर्णचन्द्रनिभाननः ॥८॥

श्रमिकेभ्यश्शोषितेभ्यः कल्पवृक्ष इव स्थितः ।
देशविदेशप्रधानेभ्यो मानदः कर्मतत्परः ॥९॥

तटस्थतां स्वदेशाय विदेशेभ्यो निरस्यताम् ।
सहास्तित्वं समस्तेभ्य शशाम भारतमणिः ॥१०॥

प्रधानामात्यचावस्य चीनदेशनिवासिनः ।
शशाम समरज्वालां वाडवाग्निमिवोदधिः ॥११॥

भ्रातृभावं सहास्तित्वं चीनपाकनिवासिनाम् ।
शिक्षतेस्म दिवारात्रं विजयलक्ष्मीः सहोदरः ॥१२॥

इन्दिरामन्दिरं तातो गूढनयप्रवर्तकः ।
पञ्चवर्षीययोजनां त्रिकृत्वा यो महामनः ॥१३॥

चतुषष्ट्यधिकेवर्षे क्रिस्तोरेकोनविंशके ।
सप्तविंशे मईमासे सार्धद्वितीयवादने ॥१४॥

भारतस्य महारत्नं गांधिशिष्यो दिवंगतः ।
अकाण्डेऽस्तं रविर्यातो मध्याह्ने भारते तले ॥१५॥

अद्यधरा निराधारा निराशा शारदास्थली ।
अद्य लवुलमाजाश्च निराश्रयाः समागताः ॥१६॥

भगवान्स हि विश्वात्मा शान्तिदो गच्छते दिवम् ।
शक्तिदोऽस्तु प्रजातन्त्रे भारतस्य जने जने ॥१७॥

जनमनसि तच्छाया शान्तिदास्तु युगे युगे ।
यशसा पूरितं येन त्रैलोक्यं सचराचरम् ॥१८॥

सुरूपा मौक्तिके हारे जगोऽफ कौस्तुभद्युतिम् ।
कमला हृदये सम्यक् दधार भारतं मणिम् ॥१९॥

नहरूनिर्वाणदिवसे श्रद्धाभक्तिसमन्वितः ।
पुष्पाञ्जलिमिमां शुद्धां जगन्नाथः समर्पति ॥२०॥

आद्यमध्यावसानेषु रकारत्रयगुम्फितः
कमलामौक्तिकहारो रत्नत्रयविराजितः ॥२१॥
विजयताम्

—इति—

समस्यापूर्त्यभिलाषी विनीत :-
ऋषिः- जगन्नाथः शास्त्री
अध्यापक - डी०. ए०. वी०. हायर सिकण्डरी विद्यालय
रैणावारी श्रीनगर, काश्मीर।



प्रकाशन तिथि : ३-६ १९६४

KRISHNA PRINTING PRESS, SRINAGAR, KASHMIR.